6.2.8 Institution has adopted the strategies for the implementation of Simple Standard Sanskrit as medium of teaching.

Answer:

१. व्यूहः लक्ष्यप्राप्तेः सार्थकः प्रक्रमः वर्तते। तत्र सम्भाषणशिबिरं प्रधानः व्यूहः अवर्तत। सत्रारम्भे एव शास्त्रीतः आरभ्य आचार्यस्तरपर्यन्तं संस्कृतसम्भाषणशिबिराणि सञ्चाल्यन्ते । सुरससुबोधा विश्वमनोज्ञा ललिता हृद्या च संस्कृतभाषा सम्भाषणेन एव अधिगन्तुं शक्या। अतः सम्भाषणशिबिराणि बालानां संस्कृतकक्ष्यासु प्रवेशाय भाषणकलायां दक्षतासम्पादनाय च भृशम् उपाकरोत् ।

२. बालानां सुखबोधाय शिक्षकैः उपयुज्यमानाः विधयः अपि सरलाः संवृत्ताः । कालानुकूलतायाः अभावं मनसिकृत्य समयसीमानं मनसि निधाय च शिक्षकाः प्राविधिकोपकरणाश्रितान् एव विधीन् उपयुज्य अपाठयन् । अनेन बालाः अत्यन्तं लाभान्विताः भवन्ति इति ज्ञापयितुम् एव अमूदृक्षः प्रयासः विश्वविद्यालयेन विहितः । अधुना प्रत्यक्षरूपेण सदृष्टान्तं पाठयितुम् अवसरः वर्तते।

३. ग्रन्थालयेषु विद्यमानानां सरलमानकसंस्कृताश्रितानां सम्भाषणसन्देशः , चन्दमामा , सुधर्मा, भारती इत्यादीनां पठनेन अपि छात्राः लाभान्विताः भवन्ति। अतः ग्रन्थालयेषु अध्ययनाय अपि कालांशाः भवन्ति।

४. शिक्षकाः प्रतिमासं छात्रगोष्ठीं वाग्वर्धिनीसभां च आयोजयन्ति। अत्र कक्ष्यानुगुणं स्तरानुगुणं छात्राः विविधेषु पाठ्यक्रमेषु सन्निहितानां गभीरशास्त्रीयविचाराणां सरलमानकसंस्कृतभाषामाध्यमेन प्रस्तुतीकरणं कुर्वन्ति। अत्रापि छात्राणां मूल्याङ्कनं विधीयते। एवमेव अयम् अपि एकः उत्कृष्टः व्यूहः एव।

५. छात्राणां कृते शिक्षकाः पाठ्सहगामिक्रियाः प्रतिसप्ताहम् आयोजयन्ति। समयसारण्याम् अस्य उल्लेखः भवति। विश्वविद्यालयेन सर्वस्तरीयाः याः समयसारिण्यः विनिर्मिताः सन्ति ताः सर्वाः अपि सरलमानकसंस्कृतभाषायाः अभ्यासाय प्रचाराय प्रोन्नयनाय च पूरकाः एव सन्ति।

६. शिक्षाशास्त्रिणः भाविनि काले शिक्षकाः सन्तः समाजे विविधेषु विद्यालयेषु संस्कृतस्य प्रचारं कुर्वन्ति। अतः एतेषां पाठ्यक्रमे पूर्णशः सरलमानकसंस्कृतस्य अनुप्रयोगः दृश्यते। प्रशिक्षुताकार्यक्रमेषु (Internship) व्यावसायिक – क्षमतोन्नयन– कार्यक्रमेषु च विविधाः सरलमानकसंस्कृताश्रिताः क्रियाकलापाः नयनपथम् अवतरन्ति। शिक्षणाभ्यासे नियमितरूपेण सर्वेऽपि छात्राध्यापकाः सरलमानकसंस्कृतेन एव पाठयन्ति।

७. कार्यालये संस्कृतेन व्यवहारः परिदृश्येत इति मत्वा सरलमानकसंस्कृतेन कार्यालयीयेभ्यः कर्मचारिभ्यः संस्कृतेन व्यवहाराय प्रशिक्षणं प्रारब्धम्। एवं न केवलम् अध्यापने अपि तु प्राशासनिककार्येष्वपि सरलमानकसंस्कृतस्य विकासाय पूरकाः व्यूहाः उपनिबद्धाः सन्ति।